नि० षादेशः णत्वम् । द्वारमतिक्रम्य स्थिते सावकाशे देशे "तस्मिन्नन्तर्घणे पश्यन् प्रघणे सौधसद्मनः" इति भट्टिः ।

**अन्तर्जठर** अव्य० जठरस्य मध्यम् अव्ययी० । जठरस्य मध्ये, उपचारात् तत्स्थकोष्ठे न० ।

**अन्तर्जात** त्रि० अन्तर्देहमध्ये जातः । देहाभ्यन्तरजाते ।

**अन्तर्जानु** अव्य० जानुनोर्मध्यम् अव्ययी० । जानुनोर्मध्ये "अन्तर्जानु शुचौ देश उपविष्ट उदङ्मुखः । प्राङ् वा ब्राह्मेण तीर्थेन द्विजो नित्यमुपस्पृशेदिति" या० "जानुनोर्मध्ये हस्तौ कृत्वेति" रघु० ।

**अन्तर्ज्योतिस्** न० अन्तर्गतं ज्योतिःप्रकाशकत्वात् चैतन्यम् । सर्वान्तर्यामिनि परब्रह्मरूपचैतन्ये तस्य सर्वान्तर्यामित्वात्तथात्वम् ।

**अन्तर्ज्वलन** न० अन्तः देहान्तरस्य ज्वलनम् । रोगकृते देहान्तर्दाहे । अन्तःस्थो ज्वलनः । जठरानले पु० ।

**अन्तर्दधन** न० अन्तर्दध्यते आधीयते मादकताऽनेन दधकरणे ल्युट् । किण्वप्रभृतौ मद्यबीजे ।

**अन्तर्दशा** स्त्री अन्तर्गता दशा आधिपत्यकालः । ज्योतिषोक्ते महादशान्तर्गते ग्रहाणां स्वाधिपत्ययुक्तकालभेदे । दशा च नानाविधा ताश्च दशाशब्दे वक्ष्यन्ते । तत्राष्टोत्तरीयदशायामन्तर्दशाऽभिधीयते वङ्गे च तस्या एव प्रचलितत्वम् । "षट्सूर्य्यस्य दशा ज्ञेयाः शशिनोदश पञ्च च । अष्टावङ्गारके ज्ञेया बुधे सप्तदश स्मृताः । शनैश्चरे दश प्रोक्ता गुरोरेकोनविंशतिः । राहोर्द्वादश वर्षाणि भृगोरप्येकविंशति"रित्युपक्रम्य सत्याचार्य्यैः "कृत्तिकादित्रये सूर्य्यः सोमो रौद्रचतुष्टये । मघादित्रितये भौमो बुधो हस्तचतुष्टये ॥ अनुराधात्रये सौरिर्गुरुःपूर्व्वाचतुष्टये । धनिष्ठात्रितये राहुः शेषे शुक्रःप्रकीर्त्तितः ॥ सूर्य्योपप्लवभौमार्किदशातिकष्टदा नृणाम् । गुरुज्ञचन्द्रशुक्राणां यथेप्सितफलप्रदा" ॥ अन्तर्दशाज्ञानं यथा । "स्वदशाभिर्दशां हत्वा नवभिर्भागमाहरेत् । लब्धा मासास्तु तच्छेषं पूरयित्वा तु त्रिंशता ॥ अङ्कैर्हृत्वा दिनं लभ्यं तच्छेषे षष्टिपूरिते । नवभिश्च हृते लब्धा ज्ञेया दण्डास्तदन्तरे ॥ रवेः षड्वर्षमध्ये तु वेदा ४ मासा रवेर्निजाः । चन्द्रस्य दश मासाश्च दिग्दिनं पञ्चमासकाः । कुजस्य, ज्ञस्य रुद्रास्तु मासा दिग्दिवसाः, शनेः । ऋतुमासाद्यु विंशश्च गुरोर्व्वर्षोद्युविंशतिः । राहोर्मासाष्टकं ज्ञेयं भृगोर्वर्षस्तु मासकौ एवं ग्रहाणामन्येषामूह्याश्चैवान्तरादयः । यद्ग्रहस्यान्तरे यस्तु यत्संख्यकालमाप्नवान् । तत्संख्यं स्वान्तरे तस्मै सदद्यादिति निश्चयः । स्वान्तरे ग्रहणे स्वांशं स्वांशेन पूरयेत् सदा इति" ज्यो०त० । विंशोत्तरीये तु । "आद्यं कुराजीशबुकेशुपूर्व्वा वह्न्यादितो भात् क्रमशस्त्रिवारम् । मानं रसाशानगदन्तिचन्द्रकलाङ्कचन्द्राद्रिरसाद्रिविंशा" इत्युक्तेः कृत्तिकादिक्रमेण रव्यादीनां त्रिवारं रसादिमिता वर्षा महादशा । यथा कृत्तिकायां जातौ रवेः षट्वर्षाः, रोहिण्यां जातौ चन्द्रस्य १० वर्षाः, मृगे, कुजस्य ७ वर्षाः, आर्द्रायां राहोः १८ वर्षाः, पुनर्वसौ जीवस्य १६ वर्षाः, पुष्ये जातौ शनेः १९ वर्षाः, अश्लेषायां बुधस्य १७ वर्षाः, मघायां केतोः ७ वर्षाः, पूर्व्वफाल्गुन्यां जातस्य शुक्रस्य २० वर्षाः, एवमुत्तरफाल्गुन्यादिषु नवसु उत्तराषाढ़ादिषु नवसु च रव्यादीनां यथाक्रमं षड़ादिवर्षाः । तदन्तर्दशा तु "स्वदशाभिर्दशां हत्वा वसुभिर्भागमाहरेदिति" विशेषः । ततश्च उभयोर्दशयोरनुपातेनान्तर्दशामानमुन्नेयम् यथा यदि १०८ वर्षैः ६ वर्षाः तदा ६ वर्षैः किमिति इत्यादिक्रमेण त्रैराशिकेन तत्तन्मानम् एवं १२० वर्षैः यदि ६ वर्षाः तदा ६ वर्षैः किमित्यादिक्रमेण त्रैराशिकेन तत्तन्मानसिद्धिः । एवं योगिन्यादिदशायामपि अन्तर्दशामानमुन्नेयम् ।

**अन्तर्दशाह** अव्य० दशाहस्य मध्यम् अव्ययी० । दशाहाभ्यन्तरे "अन्तर्दशाहे स्यातांचेत् पुनर्मरणजन्मनी" इति मनुः दशाहपदं स्वस्वजात्युक्ताशौचदिनपरम् ।

**अन्तर्दहन** न० अन्तरभ्यन्तरे दहनम् । रोगकृते देहाभ्यन्तरदाहे । अन्तःस्थः दहनः । जठरानले पु० ।

**अन्तर्दाह** पु० अन्तर्मध्ये दाहः । देहाभ्यरसन्तापे ।

**अन्तर्दुष्ट** त्रि० अन्तः अन्तःकरणे दुष्टः । दुष्टान्तःकरणे ।

**अन्तर्द्वार** न० अन्तर्गतं द्वारम् । गृहमध्यस्थे गुप्तद्वारे । जालद्वारे क्षीरस्वामी (खिड़्की) द्वारे शबरः ।

**अन्तर्द्धा** स्त्री अन्तर्+धा स्त्रियां भावेऽङ् । अन्तर्द्धाने तिरोधाने "अन्तर्द्धामुपययुरुत्पलावलीषु" इति माघः ।

**अन्तर्द्धान** न० अन्तर्+धा—ल्युट् । तिरोधाने दृश्यपदार्थस्य दर्शनायोग्यस्थाने स्थितौ, मुन्यादीनां शरीरत्यागे च । "अन्तर्द्धानं गते रामेइति" रामायणम् ।

**अन्तर्द्धि** पु० अन्तर्+धा—कि । आच्छादने, व्यवधाने, अन्तर्धाने च "अन्तर्द्धौ येनादर्शनमिच्छति" पा० ।

**अन्तर्नगर** न० नगरस्य मध्यम् अव्ययी० । नगरमध्ये अन्तःस्थं नगरम् कर्म्म० । अन्तःपुरे । "दशाननान्तर्नगरं ददर्शेति" रामा० ।